CC-0. Digitized by eGangotri and MIDF- Delhi

बटुक भैरव स्तोत्रम्

२६

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शां ३ अनु २

व. स्त. १ श्रीमहागणपतये नमः॥ ॥मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनम्॥ शंकरं परिपप्र-
च्छ पार्वती परमेश्वरम्॥ पार्वत्युवाच॥ ॥भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु ॥आपदु-
द्धारकं मंत्रं सर्वसिद्धिप्रदं नृणाम्॥ सर्वेषां चैव भूतानां हितार्थं वांछितं मया॥ विशेषतस्तु
साधनं ८ राज्ञां वै शांतिपुष्टिप्रदं नृणाम्॥ अंगन्यासकरन्यासदेहन्याससमन्वितम्॥ वक्तुम-
र्हसि देवेश मम हर्षप्रवर्द्धनम्॥ ॥शंकर उवाच॥ ॥शृणु देवि महामंत्रमापदुद्धारहेतु-
कम्॥ सर्वदुःखप्रशमनं सर्वशत्रुविनाशनम्॥ अपस्मारादिरोगाणां ज्वरादीनां
विशेषतः॥ नाशनं स्मृतिमात्रेण मंत्रराजमिमं प्रिये। ग्रहराजभयानां च नाशनं सु-
खवर्द्धनम्॥ स्नेहाद्वक्ष्यामि ते मंत्रं सर्वसारमिमं प्रिये॥ सर्वकामार्थदं मंत्रं राज्यभोगप्र- राम: १
दं नृणाम्॥ आपदुद्धारमिदं मंत्रं वक्ष्याम्यशेषतः॥ प्रणवं पूर्वमुद्धार्य देवीप्रणा व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुच्येत्त ॥ वटुकायेति वै पश्चात् आपदुद्धारणाय च ॥ कुरु हृद्यं ततः पश्चाद् वटुकाय पु-
नर्वदेत् ॥ हे वीप्रशा बमुंठस मंत्रो द्धारमिमं प्रिये ॥ मंत्रोद्धारमिमं देवि त्रैलोक्ये चा-
पि दुर्लभं ॥ अप्रकाश्यमिमं मंत्रं सर्वथा त्किसमन्वितम् ॥ स्मरणादेव मंत्रस्य भूतप्रेतपि-
शाचकाः ॥ विद्रवंत्यति भीता वै कालरुद्रादिव प्रजाः ॥ पठेद्वा पाठयेद्वापि पूजयेद्वा-
पि पुस्तकम् ॥ नाग्निचौरभयं तस्य ग्रहराजभयं तथा ॥ न च मारीभयं किंचित्सर्वत्र सुख-
वान्भवेत् ॥ आयुरारोग्यमैश्वर्यं पुत्रपौत्रादि संपदः ॥ भवंति सततं तस्य पुस्तकस्यापि
पार्वत्युवाच ॥ ॥१२ पूजनात् ॥ भैरवो नाम आपदुद्धारणो मतः ॥ [illegible] ॥ त्वया च कथि-
तो देव भैरवः कल्पउत्तमः ॥ तस्य नामसहस्राणि अयुतान्यर्बुदानि च ॥ सारमुद्धृत्य
तेषां वै नामाष्टशतकं वद ॥ यानि संकीर्त्य मर्त्यः सर्वदुःखविवर्जितः ॥ सर्वान्का-

Jagannath Bhattarai Collection, Nagarjun 7- Kathmandu, Nepal

सर्वमंगलमांगल्यं सर्वव्याधिविनाशनं आयुःकरं पुष्टिकरं श्रीकरं च यशस्करं = ३
सर्वकामसमृद्ध्यर्थं विनियोगः प्रकीर्तितः = ५

व॰ स्त॰ २ मानवाप्नोति साधकः सिद्धिमेव च ॥ ॥शंकर उवाच॥ शृणु देवि प्रवक्ष्यामि भैरवस्य म
हात्मनः॥ आपदुद्धारकस्येह नामाष्टशतमुत्तमम्॥ सर्वपापहरं पुण्यं सर्वापद्विनिवा
रणम्॥ सर्वकामार्थदं देवि साधकानां सुखावहम्॥ नामाष्टशतकस्यास्य छंदोनु
ष्टुप्प्रकीर्त्तितम्॥ बृहदारण्यको नाम ऋषिर्देवोथ भैरवः॥ अष्टबाहुस्त्रिनयन मिति
ऋ॰ ५ वीजं समीहितम्॥ शक्तिः कीलकं शेषं वा इष्टसिद्धौ नियोजयेत्॥ हृदयांगन्यासकं चैव पू
र्वं कुर्यात्समाहितः॥ रुद्रमंत्रत्रयोन्यस्य तर्जन्यो रक्तशिरवीरवम्॥ ध्यायेत्वं म ध्यम
योर्न्यस्यानामिकायां तु त्रिशूलिनम्॥ ब्रह्माणं तु कनिष्ठायां तलयोस्त्रिपुरान्तकम्॥
मां साक्षिनं करान्ते च करपृष्ठे दिगंबरम्॥ भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनं॥
नेत्रयोर्भूतदहनं सारमेयानुगं भ्रुवोः॥ कर्णयोर्भूतनाथं च प्रेतवाहं कपोलयोः॥ राम॰ २

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नासापुटोष्ठयोश्चैव भस्मांगं सर्पभूषणम्॥ अनादि नाथं चशालिनं स्तंगले
न्यसेत्॥ स्कंधयोर्दैत्यशमनं वाक्ये रतुलतेजसम्॥ पाण्योः कपालिनं न्यस्य हृदये
मुंडमालिनम्॥ शांतं वक्षस्थले न्यस्य स्तनयोः कामचारिणम्॥ उदरे च सदा तुष्टं कु
क्षेत्रेशं पार्श्वयोस्तथा॥ क्षेत्रपालं पृष्ठदेशे तैत्रज्ञं नाभिदेशके॥ पापौघनाशिनं कट्यां
वटुकं लिंगदेशके॥ गुदे रक्षाकरं न्यस्य तथा वीरकलोचनम्॥ जानुनोर्घुर्घुरारावं
जंघयो रक्तपायिनम्॥ गुल्फयोः पादुकासिद्धं पादपृष्ठे सुरेश्वरम्॥ आपादमस्तकं
चैव आपदुद्धारकं तथा॥ पूर्वे डमरुहस्तं च दक्षिणे दंडधारिणम्॥ खड्गहस्तं पश्चिमा
यां घंटावादिनमुत्तरे॥ आग्नेय्यामग्निवर्णं च नैरृत्ये चादिगंबरम्॥ वायव्ये सर्वभूत
स्थमीशान्ये चाष्टसिद्धिदम्॥ ऊर्ध्वे खेचरिणं न्यस्य पाताले रौद्ररूपिणम्॥ एवं न्यस्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क.स्त. २

देहेषु षडंगेषु ततो न्यसेत्॥ हृदये भूतनाथाय आदिनाथाय मूर्द्धनि॥ आनंदप
दपूर्वायनाथायाथशिखासु च॥ सिद्धशाबरनाथाय कवचे विन्यसे तथा॥ सहजा
नंदनाथाय न्यसेन्नेत्रत्रये तथा॥ निःसीमानंदनाथाय अस्त्रे चैव प्रयोजयेत्॥ ए
वंन्यासविधिं कृत्वा यथावत्तदनंतरम्॥ ध्यानं प्रवक्ष्यामि यथा ध्यात्वा पठे
न्नरः॥ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम्॥ नीलजीमूतसंकाशं नीलां
जनसमप्रभम्॥ अष्टवाहुं त्रिनयनं चतुर्वाहुं द्विवाहुकम्॥ दंष्ट्राकरालवदनं नू
पुरारावसंकुलम्॥ भुजंगमेखलं देवमग्निवर्णशिरोरुहम्॥ दिगंबरं कुमारीशं
वटुकाख्यं महाबलम्॥ खट्वांगमसि पाशौ च शूलं ... ॥ डमरुं च क
पालं च वरदं भुजगं तथा॥ ... वर्णसमोपेतं सारमेयसमन्वितं मूलध्यात्वाज

स्त्रि० पत्रिका नाग नः २

क.स्त. २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF Delhi

करस्फलितकपालः ॐ इलीं दंडपाणिस्त्रिशूलधारी तिमिरनीलवर्णः ... नमो भवानी ॥ ... पशुपतिः विघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानां ॥ श्री ... महाकाय कल्पांत दहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ = १

मेध्यर्य २

पोत्सु संहृष्टः सर्वान्कामानवाप्नुयात् ॥ एवं ध्यात्वा ततो देवि भैरवस्य महात्मनः ॥ आ

पुरा तेभ्यः सिद्ध्यर्थं विनियोजयेत् ॥ ॐ अस्य श्री आपदुद्धार बटुकभैरवनो मा एक्ष नेक

स्तोत्रमंत्रस्य बृहदारण्यक ऋषिः अनुष्टुप् छंदः भैरवो देवता ह्रीं बीजं बटुकायेति

उद्धारणायेति शक्तिः आपदुं कीलकं अभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ ह्रां वां अंगुष्ठाभ्यां नमः

ह्रीं वीं तर्जनीभ्यां नमः स्वाहा ॥ ह्रूं वूं मध्यमाभ्यां नमः वषट् ॥ ह्रैं वैं अनामिकाभ्यां नमः हुं ॥ ह्रौं वौं क

निष्ठिकाभ्यां नमः वौषट् ॥ ह्रः वः करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि षडंगविन्यसेत् ॥

त्रिविध ३ अथ ध्यानम् ॥ वंदे बालं स्फटिकसदृशं कुंतलोद्भासि वक्त्रं दिव्याकल्पैर्नवमणि

मयैः किंकिणीनूपुराद्यैः ॥ दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जा

भ्यां बटुकमनिशं शूलदंडौ दधानम् ॥ ॥ ~~ॐ नितीक्ष्ण ... महाकाय कल्पांत दहनो~~

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

इति सात्विकं ॥ ॥ उद्यद्भास्करसन्निभं त्रिनयनं रक्तांगरागस्त्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलजीमूतचयस्
स्तम्भधरं शीतांशुचूडोज्वलं चक्रा... कामसमं ... ॥ ... ध्यायेल्लीलाङ्कितं शशिशकलधरं मुंडमालं म
हेशं दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गपाशाभयं च ॥ नागं घंटां कपालं करसरसिरुहे बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविल
सत्किंकिणीनूपुराढ्यं ॥ इति तामसध्यानं ॥ ॥

वं.स्त. ~~[illegible]~~ ॐ ॥ भैरवो भूतनाथश्च भूतात्मा भूतभा

४ वनः ॥ क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् ॥ श्मशानवासी मांसाशी खर्पराशी क्षेत्रपो

स्मरांतकृत ॥ रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः ॥ कंकालः कालशमनः क करा ३

लाकाष्ठातनुः कविः ॥ त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥ शूलपाणिः खड्गपाणिः

कंकपाप कंकाली धूम्रलोचनः ॥ अभीरु भैरवीनाथो भूतपो योगिनीपतिः ॥ धनदो धनहारी च धोभीम

धनवान् प्रतिभानवान् ॥ नागहारो नागपाशो व्योमकेशः कपालभृत् ॥ कालः क

अग्निनेत्रो पालमाली च कमनीयः कलानिधिः ॥ त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥

त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रियः ॥ वटुको वटुवेशश्च खट्वांगवरधारकः ॥ भू

ताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ॥ धूर्तो दिगंबरः शूरो हरिणः पांडुलोचनः ॥ रामः ४

CC-0. Digitized by eGangotri and MIDF - Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शांति २ (प्रभाव ...)

प्रशांतः शांतिदः शुद्धः शंकरप्रियबांधवः ॥ अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥
अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः ॥ भूधरो भूधराधीशो भूपतिर्भूधरात्मकः ॥ कं
कालधारी मुंडी च नागयज्ञोपवीतवान् ॥ जृंभणो मोहनः स्तंभी मारणः क्षोभणस्तथा ॥
३ शुद्धो नीलांजनप्रख्यो दैत्यहा मुंडभूषितः ॥ बलिभुक् बलिभुन्नाथो बालो बालपराक्रमः ॥
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥ कामी कलानिधिः कांतः कामिनीवशकृद्व
शी ॥ सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रतापवान् ॥ ॥ अष्टोत्तरशतं नाम्नां भैरवस्य
महात्मनः ॥ मया ते कथितं देवि रहस्यं सर्वकामिकम् ॥ य इदं पठति स्तोत्रं नामाष्टशत
मुत्तमम् ॥ सर्वपापहरं पुण्यं सर्वकामफलप्रदम् ॥ न तस्य दुरितं किंचित्स्मानुयान्मान
वः कचित् ॥ पातकानां भयं नैव पठेत् स्तोत्रमनुत्तमम् ॥ मारीभये राजभये तथा चोराग्नि
ग्रहरोगाणां भयं कचित् नशत्रुभ्यो भयं द्धि २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने
CC-0. Digitized by eGangotri and MIDF- Delhi
=भये शत्रुसमागमे=

बं.स्त. ऽग्निभये॥ बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः॥ सर्वं प्रशममायाति भयं भैरवकी
५ र्तनात्॥ एकादशसहस्रं तु पुरश्चरणमुच्यते॥ संध्यासु संध्यं जपेद्देवि संवत्सरमतंद्रि
तः॥ स सिद्धिमवाप्नुयादिष्टां दुर्लभामपि मानवः॥ षण्मासं भूमिकामस्तु जपित्वाप्र
प्नुयान्महीम्॥ राजशत्रुविनाशाय जपेन्मासाष्टकं यदि॥ रात्रौ वारत्रयं चैव नाश
यत्येव शात्रवान्॥ जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत्॥ धनार्थी च सुतार्थी
जपे ४ च दारार्थी यस्तु मानवः॥ पठेन्मासत्रयं देवि वारमेकं तथा निशि॥ धनं पुत्रांस्तथा
त्र ३ दारान्प्राप्नुयान्नात्र संशयः॥ रोगी रोगात् मुच्येत बद्धो मुच्येत बंधनात्॥ भीतो भया
त्प्रमुच्येत देवि सत्यं न संशयः॥ निगडैश्चापि यो बद्धः कारागृहनिपातितः॥ शृंख राम:
ला बंधनं प्राप्तः पठेच्चैव दिवानिशि॥ यान्यान्कामानिहेते कामांस्तान्प्राप्नोति नि ५
वापि ४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्यति ध्रुवम्॥ अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्॥ सुकुलीनाय शान्ताय ऋजवे दंभ
वर्जिते॥८ यः स्तोत्रमिदं पुण्यं सर्वकामफलप्रदम्॥ इति संक्षेपतो देवि नामाष्टश
तमुत्तमम्॥ संतोषं परमं प्राप्य भैरवस्य महात्मनः॥ भैरवोपि प्रसन्नोभूत्सर्वलोकमहे
श्वरः॥ ॥इति श्रीरुद्रयामले विश्वसारोद्धारे आपदुद्धारबटुकभैरवस्तोत्रं संपू
र्णम्॥ ॥यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्॥ तत्सर्वं पूर्णतां यातु त्वत्प्रसादात्कि
भैरव॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥शुभम्॥ ॐ

भैरवो हि जगत्ख्यातं पुंसां श्रुत्वा वा च: शुभाशुभा:॥ अशुभं वाकमादजेतुरी
रवमिव विरञ्जुज: १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi